# Sadashivaproktam Shivapujamahimopadesham

# सदाशिवप्रोक्तं शिवपूजामहिमोपदेशम्

## Document Information

Text title : Sadashivaproktam Shivapujamahimopadesham

File name : shivapUjAmahimopadeshamsadAshivaproktaM.itx

Category : shiva, shivarahasya, pUjA, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 15 | vAvRittashlokAH ||

Latest update : May 3, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 4, 2024

*sanskritdocuments.org*

# सदाशिवप्रोक्तं शिवपूजामहिमोपदेशम्

पार्वत्युवाच -
महेश देवदेवेश तव पूजनमन्वहम् ।
कथं कार्यं साधनानि कानि शम्भो तवार्चने ॥ १॥

श्रीशिव उवाच -
नन्दिकेशः पुरा देवि मामभ्यर्च्य प्रयत्नतः ।
पूजाविधानं पप्रच्छ ममैव परमात्मनः ॥ २॥

(नन्दिकेश उवाच)
गौरीवल्लभ देवेश सर्वज्ञ करुणानिधे ।
शिवपूजाविधानं मे निरूपय कृपानिधे ॥ ३॥

शिवस्य पूजनात्पूर्वं कि कर्तव्यं प्रयत्नतः ।
शिवपूजाविधानानि कानि पापहराणि च ॥ ४॥

कीदृशः शिवपूजायामधिकारी महेश्वर ।
कीदृशेन कृता पूजा तव प्रियकरा विभो ॥ ५॥

कथं ध्येयोऽसि भगवन्पूजनीयः कथं भवान् ।
कथं वा पूजितो मोक्षं प्रयच्छसि सदाशिव ॥ ६॥

सदाशिव उवाच -
साधु साधु गणश्रेष्ठ प्रश्नोऽयं शुभदस्तव ।
वक्ष्ये पूजाविधि सम्यक् शृणु सर्वार्थसाधनम् ॥ ७॥

मह्यं विधाय यां पूजां मद्भक्तो मत्परायणः ।
मुच्यते सर्वपापेभ्यः सेयं पूजा मयोच्यते ॥ ८॥

पूज्योऽहमेव देवेभ्यः सर्वेभ्यो देवपुङ्गवः ।
सर्वोत्कर्षेण पूज्योऽहं सर्वेभ्योऽप्युत्तमोत्तमः ॥ ९॥

देवाधिदेवं विश्वेशं महादेवं जगत्प्रभुम् ।
सर्वोत्कर्षेण सम्पूज्य मुच्यते सर्वकिल्बिषैः ॥ १०॥

यो नित्यं शिवपूजायां निरतः शिवतत्परः ।
स विष्णुमुख्यैरमरैः पूजनीयो न संशयः ॥ २२॥

शिवपूजापरं दृष्ट्वा देवा विष्णुपुरोगमाः ।
पूजनीयं प्रस्तुवन्ति प्रणमन्ति मुहुर्मुहुः ॥ २३॥

अयं धन्यतमो मर्त्यः शिवपूजापरायणः ।
भाग्यवानिति सर्वेऽपि मन्यन्ते त्रिदशाः सदा ॥ २४॥

यद्देहापगमे मोक्षो यस्य तस्यैव देहिनः ।
महादेवस्य पूजायां मतिर्भवति नान्यथा ॥ २५॥

सर्वोत्कर्षं शिवं मत्वा मामर्चयति यो नरः ।
तस्मै दास्यामि कैवल्यं नान्यस्मै सत्यमुच्यते ॥ २६॥

यस्यासाधारणी भक्तिर्मयि सर्वोत्तमे शिवे ।
स एव मुक्तिकान्तायाः कान्तो भवति नेतरः ॥ २७॥

सर्वदेवाधिदेवं मां शिवं योऽभ्यर्चयिष्यति ।
स देवोरगगन्धर्वयक्षपूज्यो भविष्यति ॥ २८॥

यो मत्पूजापरो मर्त्यस्तद्वारि सकलाः सुराः ।
कृताञ्जलिपुटा नित्यं स्थास्यन्त्येव न संशयः ॥ २९॥

अनन्यशरणो यस्तु शिवपूजापरायणः ।
न तस्य सम्पदो दूरे सत्यं सत्यं न संशयः ॥ ३०॥

तस्यैश्वर्यं तस्य विद्या यस्य भक्तिः सदाशिवे ।
तस्यैव मुक्तिरप्यन्ते सत्यं सत्यं न संशयः ॥ ३१॥

स एव सर्वभाग्यानामालयो भवति ध्रुवम् ।
शिवे किं बहुना यस्तु श्रद्धया शिवमर्चयेत् ॥ ३७॥

न तस्य नरकावासः स मे भक्तः स मे प्रियः ।
एकमेव महादेवं भक्तया योऽभ्यर्चयिष्यति ॥ ३८॥

स शाङ्कर इति ज्ञेयः स एव मम सम्मतः ।
एकोऽहं पूजितो नित्यं दास्यामि परमां गतिम् ॥ ३९॥

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
अनन्यशरणो यस्तु सर्वधर्मान्विहाय माम् ॥ ४० ॥

अर्चयिष्यति पुण्यात्मा स एव मम सम्मतः ।
यः शङ्करैकशरणो यः शिवैकार्चनप्रियः ॥ ४१ ॥

स एव सर्वधर्माणामाश्रयो भवति ध्रुवम् ।
धर्मार्थकाममोक्षार्थं मामभ्यर्च्य सदाशिवम् ॥ ४२ ॥

धर्मार्थकाममोक्षाणामाश्रयो भवति ध्रुवम् ।
ऐहिकाऽऽमुष्मिकं वापि यो मत्तः काङ्क्षते फलम् ॥ ४३ ॥

स मामभ्यर्च्य विश्वेशं समवाप्नोति तत्फलम् ।
मामभ्यर्च्य महादेवं स्वशक्त्या मन्मनाः सदा ॥ ४४ ॥

कदाचिदपि दुःखानि न प्राप्नोत्येव मानवः ।
यो मदर्पितसत्कर्मा मदाराधनतत्परः ॥ ४५ ॥

स मद्भक्तस्ततस्तेन कृता पूजा मम प्रिया ।
परमेश्वरमाराध्यं सर्वैश्वर्यपतिं शिवम् ॥ ४६ ॥

पूजनीयोऽत एवाहं पूजनीयो नरैरपि ।
ब्रह्मोपेन्द्रप्रभृतयो देवाः सर्वे मुनीश्वराः ॥ ४९ ॥

मामर्चयन्ति मामेव शरणं प्राप्नुवन्ति च ।
सर्वेभ्य एव देवेभ्यो यतोऽस्मि सुमहानहम् ॥ ५० ॥

तत एव महादेव वदन्ति निगमाश्च माम् ।
न मत्तोऽभ्यधिको देवः सर्वेभ्योऽपि महानहम् ॥ ५१ ॥

अत एव महादेवः प्रथितो निगमेष्वहम् ।
यं यमुद्दिश्य कर्माणि करिष्यन्ति फलेप्सवः ॥ ५२ ॥

तानि कर्माणि मय्येव प्रविशन्ति फलप्रदे ।
फलप्रदाता भगवान्कर्मणामहमेव हि ॥ ५३ ॥

तस्मान्मदन्यफलदः कर्मणां नास्ति सर्वथा ।
यं यं यं देवमुद्दिश्य नमस्काराः कृता नरैः ॥ ५४ ॥

ते सर्वेऽपि नमस्काराः प्रविशन्ति च मां प्रिये ।

यं यं देवं समुद्दिश्य या या पूजा कृता मुदा ॥ ५५॥

सा मयि प्रविशत्येव पूजा सर्वापि सर्वथा ।
राज्ञे साक्षाद्धनं दातुमशक्तो मनुजः सदा ॥ ५६ ॥

अधिकारिमुखादेव प्रवेशयति भूपतिम् ।
साक्षान्मत्पूजने यस्तु समर्थस्तेन सर्वदा ॥ ५७॥

ममैव पूजा कर्तव्या नान्यदेवस्य सर्वदा ।
द्रव्यदाने समर्थो यस्साक्षाद्राज्ञे नरस्तथा ॥ ५८॥

राज्ञे द्रव्यं ददात्येव साक्षान्मानपुरःसरम् ।
अतः साक्षाद्धनं दत्तं येन राज्ञे मनीषिणा ॥ ५९॥

तेन राजप्रसादोऽपि प्राप्यते सर्वसौख्यदः ।
यं साक्षाद्वेत्ति राजानं यस्तु राजप्रसादतः ॥ ६०॥

स राजान्यान्प्रधानांस्तु नाराधयति सर्वथा ।
एवमेव मदर्चायामधिकादरवान्नरः ॥ ६१॥

मदन्यं नार्चयेदेव मदन्यः फलदो न हि ।
किमन्याराधनेनापि मदन्योऽभीष्टदस्तु कः ॥ ६२॥

ततोऽहमेक एवार्यैः पूजनीयः प्रयत्नतः ।
शिवान्यः फलदोऽस्तीति प्रवदन्त्यशिवास्तु ये ॥ ६३॥

तादृशानशिवान्स्पृष्ट्वा सचेलः स्नानमाचरेत् ।
मदन्यः कर्मफलदः कथं भवितुमर्हति ॥ ६४॥

॥ इति शिवरहस्यान्तर्गते सदाशिवप्रोक्तं शिवपूजामहिमोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् उग्राख्यः सप्तमांशः । अध्यायः १५ । वावृत्तश्लोकाः ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 15 . vAvRRittashlokAH ..

Notes:

Upon being requested, Śiva शिव gives Upadeśa उपदेश to Pārvatī पार्वती about the merits of worshipping Him.

Encoded and proofread by Ruma Dewan

*Sadashivaproktam Shivapujamahimopadesham*

pdf was typeset on May 4, 2024

Please send corrections to *sanskrit@cheerful.com*